# संस्कृतवार्ता:

**दिनाङ्क :- 22.05.2025** **प्रात: - 06:55**

**अथ वार्ता:**

**वेन्स-भारतयात्रा**

अमरीकोयोपराष्ट्रपति: जे.डी. वैन्स-इत्येष: गतरात्रौ जयपुरं सम्प्राप्तवान्। उपराष्ट्रपति: वैन्सइत्यसौ त्रीणि दिनानि यावत् जयपुरे एव स्थास्यति। जयपुरयात्रावधौ श्रीवैन्स इत्येतस्य परिवारोऽपि तेन सह भविष्यति। परिवारजनेषु तस्य भारतीयमूला पत्नी उषावैन्स-इत्येषा त्रय: बाला: च सम्मिलिता: विद्यन्ते। अपि च उपराष्ट्रपतिना साकम् अमरिकीयप्रशासनस्य वरिष्ठाधिकारिणोऽपि उपस्थिता: भविष्यन्ति। श्रीवैन्स इत्ययं अद्य प्रात: काले स्वकुटुम्बेन समम् ऐतिहासिकस्य आमेर-दुर्गस्य होरात्रयं यावत् भ्रमणं विधास्यति यत्र तस्य पारम्परिकरीत्या सह स्वामतं विधास्यते। मध्याह्ने च श्रीवैन्सइत्येष: जयपुरे भारतामरिका-व्यापार-सम्बन्धानाम् भविष्ये आधारितम् व्यापारिकं सम्मेलनमपि सम्बोधयिष्यति। अत्रान्तरे असौ राज्यपालेन हरभाऊ-भागड़े इत्यमुना मुख्यमन्त्रिणा भजनलालशर्मणा साकं संवादं साधयिष्यति। अमेरिकीयोपराष्ट्रपते: यात्रां निध्याय व्यापकी सुरक्षाव्यवस्था यातायातप्रबन्धनमपि समनुष्ठितमस्ति।

**प्रधानमन्त्री-सऊदीअरबयात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रभृति सऊदी-अरब-देशस्य क्राउनप्रिंस-इत्येतस्य प्रधानमन्त्रिण: मोहम्मद-बिन-सलमान-इत्यस्य च निमन्त्रणे सऊदी-अरब-देशस्य द्वि-द्विवसीययात्रायां भविष्यतीति सूच्यते। एनं देशं प्रति प्रधानमन्त्रिण: तृतीया आधिकारिकी यात्रा भवेदिति। अनया हि यात्रया भारतसऊदी-अरब-देशयो: मध्ये व्यापारोर्जा-रक्षा-चेत्यादिषु क्षेत्रेषु सहभागिताया: संवर्धनं भविष्यति। प्रधानमन्त्रिण: एषा यात्रा तावत् तस्मिन् क्षणे महत्वपूर्णा जायते यदा सऊदी-अरब-देश: स्वमहत्त्वकांक्षिणं लक्ष्यं त्रिंशदधिकद्विसहस्रतमवर्षीयम् संधारयति। एतद्धि षोडशाधिक-द्विसहस्रतमे वर्षे प्रारब्धा एका व्यापकी राष्ट्रिय-रणनीति: वर्तते। यस्य प्रयोजनम् देशस्यास्य अर्थव्यवस्थायां विविधताया: आनयनं नागरिकाणाम् उद्धारं अपि च देशेऽस्मिन् नवाचारयुता स्थिरता समावेशिविकासे वैश्विकनेतृत्वेन च गणना इत्यपि प्रयोजनमस्तीति।

**सीतारामन्-अमरीकादेश:**

वित्तमन्त्रिणा निर्मला-सीतारामन्-इत्यनया निगदितं यत् भारतं सक्रियतया नवीनेन अमरीकीय-प्रशासनेन सह मन्त्रणां साधयति तथा च प्रयोजनम् अस्य वर्षस्य सितम्बर-अक्टूबर-मासौ यावत् द्विपक्षीय-व्यापार-सहभागित्वस्य प्रथमचरणस्य अन्तिमप्रारूपप्रदानमिति विद्यते। स्वामरिकाप्रवासावधौ वित्तमन्त्री पञ्चदिवसान् यावत् अमरिकासचिवेन स्कॉट-बेसेण्ट-इत्येतेन सह संयुक्तराज्यामरिकाया: व्यापार-प्रतिनिधि-कार्यालयस्य अधिकारिभि: सह मिलिष्यति। अस्यां

यात्रायां वित्तमन्त्रिण: स्टैनफोर्ड-विश्वविद्यालये मुख्यभाषणं निवेश-प्राविधिक-सहयोगयो: सैन-फ्रांसिस्को-नगरे मुख्यकार्यकार्यधिकारिभि: सह उपवेशनानि निर्धारितानि सन्ति एवञ्च भारतस्य सांस्कृतिकप्रापणं संवर्धयितुं प्रवासि-कार्यक्रमेषु सम्मेलनं चास्ति।

**संयुक्तसंसदीयसमिति:**

अद्य 'एकं राष्ट्रं, एकं निर्वाचनं' इत्येतस्मिन् विषये संयुक्तसंसदीयसमित्याःसभा भविष्यति। प्रथमे सत्रे सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशेन न्यायाधीशेन हेमन्तगुप्ता इत्यनेन सह संवादः भविष्यति। तदनन्तरं न्यायमूर्तिण: एस्. एन्. झा इत्यतेन, पूर्व-मुख्य-न्यायाधीशेन जम्मू-कश्मीर्-उच्चन्यायालयस्य सह सत्रद्वयं भविष्यति। अग्रिमे सत्रे सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशः, भारतस्य एकविंशतितमस्य विधि-आयोगस्य अध्यक्षः च सम्मिलिता: भविष्यन्ति। अन्तिमं सत्रं राज्यसभायाः सदस्येन वरिष्ठेन अधिवक्त्रा च डा. अभिषेक मनु सिंघवी इत्यनेन सह भविष्यति।

**पोप-दु:खम्**

पोप-फ्रांसिस-इत्येतस्य अष्टाशीति-सुदीघरोगस्य कारणेन जाते वर्ष-वयोमिते आयौ निधने समग्र विश्वं तस्मै श्रध्दाञ्जलिं समर्पयति। प्रधानमत्रिणं नरेन्द्रमोदिनं समेत्य यूरोपीयायोगाध्यक्षा रशिया- फ्रांस- ब्रिटेन देशाः च दिवङ्गताय पोप-इत्येतस्मै श्रद्धाञ्जलिं समर्पयन्ति। भारते प्रशासनेन सम्मानाधीनयुतं भूत्वा त्रयाणां दिनानां राजकीयशोकः समुद्घोषित:।

**क्रीडावार्ता:**

भारतीयलक्ष्यवेधक: सिमरनप्रीत-कौर ब्रार-इत्यसौ पेरुनगरस्य लीमाइत्यत्र लास-पालमास- शूटिङ्गरेंज इत्येतस्मिन् अन्ताराष्ट्रिय-लक्ष्यवेध-खेल-महासङ्घ-विश्व-चषके महिलानां पञ्चविंशति-मीटरात्मके पिस्टलद्वन्द्वे रजतपदकम् अवाप्य स्वकीयं प्रथमम् वरिष्ठान्ताराष्ट्रियं पदकं विजितवती।

**आई.पी.एल्.**

आई.पी.एल्. इत्येतस्यां विंशतिप्रतिविंशतिक्रिकेट्-मालिकायाम् शुभमनगिल-नेतृत्वयुतेन गुजरात-टाइटन्सदलेन ह्य: रात्रौ कोलकातानगरे ईडनगार्डन्सक्रीडाङ्गणे कोलकाता-नाइट-राइडर्स-दलम् नवत्रिंशत्धावनाङ्कै: पराभूतम्। अद्य लखनऊनगरे एकानाक्रीडाङ्गणे लखनऊ-सुपर-जायन्ट्स-डेल्हीकैपिटल्सदलयो: मध्ये द्वन्द्वं क्रीडिष्यते।